# Shri Suryaryadvadashaka Stuti

# श्रीसूर्यार्याद्वादशकस्तुतिः

## Document Information

Text title : Shri Suryaryadvadashaka Stuti

File name : sUryAryAdvAdashakastutiH.itx

Category : navagraha, dashaka, dvAdasha, stuti

Location : doc_z_misc_navagraha

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# श्रीसूर्यार्याद्वादशकस्तुतिः

उद्यन्नद्य विवस्वानारोहन्नुत्तरां दिवं देवः ।
हृद्रोगं मम सूर्यो हरिमाणं च नाशयतु मे मित्रः ॥ १॥

ॐ मित्राय नमः ।

निमिषार्धेनैकेन क्रममाणो द्वे शते द्वे सहस्रे च ।
यो योजनानां नमोऽस्तु तस्मै श्रीनलिननाथाय रवये ॥ २॥

ॐ रवये नमः ।

शिवस्वरूपाद् ज्ञानं त्वत्तो मुक्तिं जनार्दनाकारात् ।
शिखिरूपाच्चैश्वर्यं भवतश्चारोग्यमिच्छाम्यहं सूर्य ॥ ३॥

ॐ सूर्याय नमः ।

कर्मज्ञानखदशकं मनश्च जीव इति विश्वसर्गाय ।
यो द्वादशधा चरति द्वादशकलो मुदेऽस्तु मे भानुः ॥ ४॥

ॐ भानवे नमः ।

त्वमृग्यजुस्त्वं त्वं सामाथर्वस्त्वं त्वमागमस्त्वं वषट्कारः ।
त्वं हंसः परमहंसः त्वं प्राज्ञः त्वं महत्त्वं खगोऽसि त्वम् ॥ ५॥

ॐ खगाय नमः ।

त्वचि दोषा दृशि दोषा हृदि दोषा ये निखिलेन्द्रियेषु दोषाः ।
तान्भगवानपनयतु कृपातरङ्गितदृष्ट्या मम पूषा ॥ ६॥

ॐ पूष्णे नमः ।

तिमिरमिव नेत्रतिमिरं पटलमिव रोगपटलं कोशात् ।
काचमिवाधिं निराकुर्यात् कालत्रयाच्र्यो हिरण्यगर्भोऽसौ ॥ ७॥

ॐ हिरण्यगर्भाय नमः ।

धर्मार्थकाममोक्षप्रतिघातानुग्रवेगतापकरान् ।
बन्दीकृतेन्द्रियगणान् गदान् चण्डांशुरपनयतु मरीचिः ॥ ८॥

ॐ मरीचये नमः ।

येन विनान्धं तिमिरं जगदेति यस्मिन्सति च सुबोधम् ।
तं च नलिनीभर्तारं हर्तारमापदो नौम्यहमादित्यम् ॥ ९॥

ॐ आदित्याय नमः ।

यस्य सहस्राभीशोरभीशुलेशो हि हिमांशुबिम्बगतः ।
भासयति नक्तमखिलं खिलयतु विपदः सदा सविता ॥ १०॥

ॐ सवित्रे नमः ।

काशाश्मरिदुर्नामत्वग्रोगमहोदर प्रमेहांश्च ।
ग्रहणी भगन्दराद्यान् महारुजस्त्वमर्क हरसि जन्तूनाम् ॥ ११॥

ॐ अर्काय नमः ।

त्वं शरणं त्वं माता त्वं च पिता त्वं धनं त्वमाचार्यः ।
त्वं भर्ता त्वं हर्ता विपदां प्रसीद भास्कर मे सततम् ॥ १२॥

ॐ भास्कराय नमः ।

इत्यार्याद्वादशकं साम्बात्पुरतो नभःस्थलात्पतितम् ।
पठतां भाग्यसमृद्धिः भूयसी समस्तरोगोपशान्तिश्च ॥ १३॥

चाक्षुष्मतीं(१) विद्यां सौरीं जप्त्वाऽऽदावनयाऽऽनम्य मार्ताण्डम् ।
अन्धानां जन्मतो दृष्टिः शीघ्रं गृह्णाति दूरतो विषयान् ॥ १४॥

हेमाम्भोजप्रवालप्रतिमनिजरुचिं चारु खट्वाङ्गपद्मं
    चक्रं शक्तिं च पाशं सृणिमतिरुचिरामक्षमालां कपालम् ।
हस्ताम्भोजैर्दधानं त्रिनयनविलसद्वेदवक्त्राभिरामं
    मार्ताण्डं वल्लभार्धं मणिमयमकुटं हारदीप्तं भजामः ॥ १५॥

सूर्यं सुन्दरलोकनाथममृतं वेदान्तसारं शिवं
    ज्ञानं ब्रह्ममयं सुरेशममलं लोकैकचित्तं स्वयम् ।
इन्द्रादित्य नराधिपं सुरगुरुं त्रैलोक्य चूडामणिं
    विष्णुब्रह्म शिवस्वरूपमनिशं वन्दे सदा भास्करम् ॥ १६॥

भानो भास्कर मार्ताण्ड चण्डरश्मे दिवाकर ।
आयुरारोग्यमैश्वर्यं विद्यां देहि नमोऽस्तुते ॥ १७॥

१ चक्षुष्मती विद्या-चाक्षुषोपनिषदि-अस्याः चाक्षुषी विद्यायाः अहिर्बुध्न्य ऋषिः । गायत्री छन्दः । सूर्यो देवता । चक्षुरोगनिवृत्तये जपे विनियोगः । (मन्त्रः) ॐ चक्षुः चक्षुः चक्षुः तेजः स्थिरो भव । मां पाहि पाहि । त्वरितं चक्षुरोगान् शमय शमय । मम जातरूपं तेजो दर्शय दर्शय । यथाऽहमन्धो न स्यां तथा कल्पय कल्पय कल्याणं कुरु कुरु । यानि मम पूर्वजन्मोपार्जितानिःचक्षुःप्रतिरोधकदुष्कृत्यानि सर्वाणि निर्मूलय निर्मूलय । ॐ नमश्चक्षुस्तेजोदात्रे दिव्याय भास्कराय । ॐ नमः करुणाकरायामृताय । ॐ नमः सूर्याय । ॐ नमो भगवते सूर्यायाक्षितेजसे नमः । खेचराय नमः । महते नमः । रजसे नमः । तमसे नमः । असतो मा सद्गमय । तमसो मा ज्योतिर्गमय । मृत्योर्मा अमृतं गमय । उष्णो भगवाञ्छुचिरूपः । हंसो भगवान् शुचिरप्रतिरूपः । य इमां चक्षुष्मतीविद्यां ब्राह्मणो नित्यमधीते न तस्याक्षिरोगो भवति । न तस्य कुले अन्धो भवति । अष्टौ ब्राह्मणान् ग्राहयित्वा विद्यासिद्धिर्भवति । ॐ विश्वरूपं घृणिनं जातवेदसं हिरण्मयं पुरुषं ज्योतिरूपं तपन्तम् । विश्वस्य योनिं प्रतपन्तमुग्रं पुरः प्रजानामुदयत्येष सूर्यः । ॐ नमो भगवते आदित्याय अहोवाहिन्यहो वाहिनि स्वाहा । ॐ वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः । अपध्वान्तमूर्णुहि पूर्द्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् । पुण्डरीकाक्षाय नमः । पुष्करेक्षणाय नमः । अमलेक्षणाय नमः । कमलेक्षणाय नमः । विश्वरूपाय नमः । महाविष्णवे नमः ।
चाक्षुष्मती विद्या -अक्ष्युपनिषदि-
ॐ नमो भगवते सूर्यायाक्षितेजसे नमः । ॐ खेचराय नमः ।
ॐ महासेनाय नमः । ॐ तमसे नमः । ॐ रजसे नमः । ॐ सत्त्वाय नमः । असतो मा सद्गमय । तमसो मा ज्योतिर्गमय । मृत्योर्मा अमृतं गमय । उष्णो भगवान् शुचिरूपः । हंसो भगवान् शुचिरप्रतिरूपः । विश्वरूपं घृणिनं जातवेदसं इरामयं ज्योतीरूपं तपन्तम् । सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः । ॐ नमो भगवते श्रीसूर्यायाक्षितेजसेऽहो वाहिनि वाहिनि स्वाहा ॥

इति श्रीसूर्यार्याद्वादशकस्तुतिः समाप्ता ।

(This is similar to sUryastutI dvAdashAryA sAmbakRita)

Proofread by Aruna Narayanan

*Shri Suryaryadvadashaka Stuti*

pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*